अष्टादशः पाठः

# दीपावलिः

भारतवर्षे बहवः उत्सवाः भवन्ति। यथा- नवरात्रं, होलिका, रक्षाबन्धनं च। एतेषु दीपावलिः इति प्रधानः उत्सवः कार्तिकमासे कृष्णपक्षे अमावस्यायां तिथौ भवति। भगवतः रामस्य अयोध्यागमने अयोध्यायां प्रथमं दीपावलिः आयोजिता इति जनश्रुतिः। एषः दीपोत्सवः प्रकाशोत्सवः च। एषः पञ्चदिवसीयः उत्सवः। अस्य पञ्चसु अपि दिवसेषु सर्वत्र दीपानाम् आवलिः दृश्यते।



प्रथमदिवसे त्रयोदश्यां जनाः आभूषणानि गृहपात्राणि स्वर्णं रजतं वा क्रीणन्ति। धन्वन्तरीति वैद्यराजः अद्य एव पूज्यते। द्वितीयदिवसस्य चतुर्दश्याः विशेषता अस्ति सूर्योदयात् प्राक् अभ्यङ्गस्नानम्। तृतीयदिवसे अमावास्यायां जनाः धनदेवीं लक्ष्मीं पूजयन्ति। व्यापारिणः व्यापारपुस्तकानामपि पूजनं कुर्वन्ति।



चतुर्थे दिवसे कार्तिकप्रतिपदि शुक्लपक्षे व्यापारिणां नूतनः संवत्सरः प्रारभते। कृषकाः पशुपालकाः च गोवर्धनं पूजयन्ति गोधनं च अलङ्कुर्वन्ति। अन्तिमदिवसे द्वितीयायां भ्रातृभगिन्यौ मिलतः, परस्परं सत्कारयतः परस्परयोः दीर्घजीवनं सुखसमृद्धिं च कामयतः।



अस्मिन् समये सर्वत्र आनन्दः प्रवर्तते। कृषकाणां गृहेषु नूतनान्नं नवधान्यं समागच्छति। नदीजलं स्वच्छम् आकाशः निरभ्रः दृश्यते। आपणाः द्रव्यैः ग्राहकैः च परिपूर्णाः भवन्ति।

बालकाः अग्निक्रीडनकानि ज्वालयन्ति। गृहेषु मिष्टान्नस्य सेवनं भवति। लाजाः देवेभ्यः अतिथिभ्यः च समर्पिताः भवन्ति। गृहाणां पुरतः अल्पनारेखनं दृश्यते।

तमसो मा ज्योतिर्गमय इति दीपावलिसन्देशः। सर्वे जनाः परस्परं मिलन्ति अभिनन्दन्ति च। अभिनन्दनपत्राणि ते प्रेषयन्ति ते प्रार्थयन्ति –

शुभं करोतु कल्याणं, आरोग्यं सुखसम्पदम्।
शत्रुबुद्धिविनाशाय दीपज्योतिर्नमोऽस्तु ते।।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| जनश्रुतिः | = लोगों की मान्यता | आवलिः | = | कतार, पंक्ति |
| स्वर्णं | = सुवर्ण को | रजतं | = | चाँदी के |
| क्रीणन्ति | = खरीदते हैं | | | |
| धन्वन्तरिः | = यह भारतीय परम्परा में प्रथम वैद्य हैं। | | | |
| प्राक् | = पूर्व | | | |
| अभ्यङ्गस्नानम् | = मङ्गलस्नान (यह शरीर पर तेल लगाकर गर्म जल से किया जाता है) | | | |
| संवत्सरः | = वर्ष | कामयतः | = | कामना करते हैं। |
| अग्निक्रीडनकम् | = आतिशबाजी | लाजाः | = | धान की लाई |
| अल्पना | = रंगोली | तमसः | = | अन्धेरे से |
| ज्योतिर्गमय | = उजाले की ओर ले चलो। | | | |

## अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) दीपावल्याः उत्सवे कति दिवसाः सन्ति?

(ख) धन्वन्तरिपूजनं कस्मिन् दिने भवति?

(ग) व्यापारिणां नूतनः संवत्सरः कदा प्रारभते?

२. एकवाक्येन उत्तरं लिखत–

(क) दीपावल्यां लक्ष्मीः कदा पूज्यते?

(ख) कः दीपावलिसन्देशः?

(ग) भ्रातृभगिन्यौ किं कामयतः?

(घ) अल्पनारेखनं कुत्र दृश्यते?

३. उचितं चित्वा पूरयत–

| | | | |
|---|---|---|---|
| (क) | बालकः .................. वस्त्रं धारयति। | | (नूतनं/नूतनानि) |
| (ख) | ..................... प्राक् अभ्यङ्गस्नानं क्रियते। | | (सूर्योदयस्य/सूर्योदयात्) |
| (ग) | भ्रातृभगिन्यौ परस्परं ...................। | | (मिलति/मिलतः) |
| (घ) | आपणाः ............... परिपूर्णाः भवन्ति। | | (ग्राहकाणां/ग्राहकैः) |

४. योजयत –

| | (अ) | (ब) |
|---|---|---|
| (क) | एकः | पञ्चमः |
| (ख) | द्वौ | तृतीयः |
| (ग) | त्रयः | प्रथमः |
| (घ) | चत्वारः | द्वितीयः |
| (ङ) | पञ्च | चतुर्थः |

५. दीपावलिः इति विषयम् आधृत्य पञ्च वाक्यानि लिखत।

## योग्यताविस्तारः —

- दीपावलितः आरभ्य निम्नलिखितानाम् उत्सवानां कालक्रमं स्थापयत–
  गणेशोत्सवः, होलिकोत्सवः, रक्षाबन्धनम्, नवरात्रम्।
- निम्नलिखितान् शब्दान् उचितरिक्तस्थानेषु योजयित्वा होलिकोत्सववर्णनं लिखत–

| | | |
|---|---|---|
| षड्दिवसीयः | षष्ठदिवसे | होलिकादहनं |
| होलिकादहनात् | धूलिवन्दनं | रङ्गपञ्चमी। |

होलिकोत्सवः ................. उत्सवः। सः ................ आरभ्य ............. पर्यन्तं भवति। प्रथमदिवसे ............... भवति। द्वितीयदिने ............ क्रियते। .................. रङ्गपञ्चमीपर्व भवति।